परिजाते वृक्षभेदे अमरः। तत्पर्य्यायादि भावप्र० उक्तं यथा "वारिपर्णी कुम्भिका स्याच्छैवालं शैवलञ्च तत्। वारिपर्णी हिमा तिक्ता लघ्वी स्वाद्वी सरा कटुः। दोषत्रयहरी रूक्षा शोणितं ज्वरशोषहृत्"। २पाटलावृक्षे ३द्रोणपुष्प्याञ्च राजनि०। "वर्त्मान्ते पिडका ध्माता भिद्यन्ते च स्रवन्ति च। कुम्भिकाबीजसदृशा कुम्भिकाः सन्निपातजाः" माधवोक्ते ४नेत्रवर्त्मस्थरोगभेदे सुश्रुते दीर्घमध्यत्वेनायं पठितः यथा "पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः। सिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः। विवर्द्ध्य मांसं रक्तञ्च तदा वर्त्मव्यपाश्रयान्। विकारान् जनयन्त्याशु नामतस्तान्निबोधत। उत्सङ्गिन्यथ कुम्भीका पोथक्यो वर्त्मशर्करा" इत्युपक्रम्य कुम्भीकबीजप्रतिमाः पिडकाः पक्ष्मवर्त्मनोः। आध्मायन्ते तु भिन्ना याः कुम्भीकपिडकास्तु ताः"। तेन माधवग्रन्थे दीर्घमध्यपाठः समुचितः। कुम्भीकपिडकेत्यत्र पुंवद्भावश्चार्षः। कुम्भा—स्वार्थे क। ५वेश्यायाम् शब्दमाला ६कट्फले भावप्र० कट्फलशब्दे तद्वाक्यादि

**कुम्भिन्** पुंस्त्री० कुम्भोऽस्त्यस्य इनि। १हस्तिनि २कुम्भीरे हेमच० स्त्रियां ङीप्। ३गुग्गुलौ जटा०। ४कलसधारिणि त्रि० स्त्रियां ङीप् "उदकं कुम्भिनीरिव" ऋ० १। १६१। १४। ङीवन्तः। ५जयपालवृक्षे राजनि० कुम्भिबीजं जयपालबीजमित्युक्तेः ६पृथिव्यां "गौरिलाकुम्भिनी चर्मेति" मा० २०,५४ श्लो० व्या० मल्लिनाथधृतकोषात्।

**कुम्भिपाकी** स्त्री कुम्भिना पाकोयस्याः गौरा०ङीष्। कट्फले भावप्र० शब्दकल्पद्रुमः भावप्र० कट्फलपर्य्याये कट्फलशब्दे दर्शिते तद्वाक्ये कुम्भिकाऽपिचेत्येव पाठः क्वचित् कुम्भिपाक्यपीति पाठः तन्मूलं मृग्यम्। [राजनि०

**कुम्भिमद** कुम्भिनः गजस्य मदः। हस्तिमदे गन्धद्रव्यभेदे

**कुम्भिल** पु० कु—उम्भ—इलच् शक०। १चौरे २श्लोकार्थचौरे ३शालमत्स्ये ५श्याले च हेमच०

**कुम्भी** स्त्री कुम्भ+अल्पार्थे ङीप्। १क्षुद्रे कुम्भे तदाकृतित्वात् २उखायां ३पाटलावृक्षे ४कुम्भिकायां वरिपत्राम् (पाना) ५कट्फले च हेमच० कोङ्कणे प्रसिद्धे कुम्भीपुष्पे ६पर्पटवृक्षे। अस्य गुणाः "कुम्भी वातकफहरी" राजनि० ७दन्तीवृक्षे राजनि०। तत्र जातादि कत्त्र्या०ढकञ्। कौम्भेयक तत्र जातादौ त्रि०। कर्षा दि० चतुरर्थ्यां फिञ्। ५कौम्भायनि तत्सन्निकृष्टदेशादौ त्रि०।

**कुम्भीक** पु० कुम्भीव कायति कै—क। १पुन्नागवृक्षे। रत्नमा० २कुम्भिकायां (पाना) कुम्भीकबीजप्रतिमाः" सुश्रुतः सुश्रुते अयं प्रियङ्ग्वादिगणे उक्तः यथा "प्रियङ्गुसमङ्गाधातकीपुन्नागरक्तचन्दनचन्दनमोचरससरसाञ्जनकुम्भीकस्रोतोऽञ्जनपद्मकेसरयोजनवल्ल्यो दीर्घमूला चेति"। तत्र पुन्नागस्य पृथक्कीर्त्तनात् कुम्भिकापरत्वम्। सुश्रुते नेत्रवर्त्मस्थे ३रोगभेदे कुम्भिकाशब्दे तद्वाक्यमुदाहृतम् तत्रोक्ते ४मूत्ररोगोपद्रवभेदे च यथा "अथातः शूकदोषनिदानं व्याख्यास्यामः। लिङ्गवृद्धिमिच्छतामक्रमप्रवृत्तानां शूकदोषनिमित्ता दश चाष्टौ च व्याधयो जायन्ते। तद्यथा सर्षपिका, अष्ठीलिका, ग्रथितम्, कुम्भीका, अलजी, मृदितम्, सम्मूढपिडका, अवमन्थः, पुष्करीका, स्पर्शहानिः, उत्तमा, शतपोनकः, त्वक्पाकः, शोणितार्बुदम्, मांसार्बुदम्, मांसपाकः, विद्रधिः, तिलकालकश्चेति,, इति विभज्य तल्लक्षणमुक्तं यथा "कुम्भीका रक्तपित्तोत्था जाम्बवास्थिनिभाऽशुभा"

"कुम्भिका रक्तपित्ताभ्यामिति भावप्र० ह्रस्वमध्यपाठस्तु लिपिकरप्रमादात्। ततः समूहे खलादि० इनि। तद्रोगसमूहे स्त्री "कुम्भीकिनीं शर्कराञ्च तथैवोत्सङ्गिनीमपि" "कुम्भीकिनी सह शर्करया लेख्या" सुश्रुतः सुश्रुतोक्ते क्लीवभेदे पु० "स्वे गुदे ब्रह्मचर्य्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते कुम्भीकः स च विज्ञेयः। इत्युक्त्वा" "आसेक्यश्च सुगन्धी च कुम्भीकः सेर्ष्यकस्तथा। अरेतसस्त्वमी ज्ञेया अशुक्रः षण्डसंज्ञितः" तल्लक्षणं तत्रोक्तम्।

**कुम्भीधान्य(क)** कुम्भीमितं धान्यमस्य वा कप्। वर्षभोग्यसञ्चितधान्ये गृहस्थभेदे "कुसूलधान्यको वा स्यात् कुम्भीधान्यक एव वा।" मनुः "वर्षनिर्व्वाहोचितधान्यादिधनः कुम्भीधान्यः" "प्राक्सौमिकीः क्रियाः कुर्य्यात् यस्यान्नं वार्षिकं भवेदिति" याज्ञवल्क्येन गृहस्थस्य वार्षिकसञ्चयाभ्यनुज्ञानात्। मनुरपि यदा वानप्रस्थस्यैव "समानिचयएव वा" इत्यनेन समासञ्चयं वक्ष्यति तदपेक्षया बहुपोष्यवर्गस्य गृहिणः समुचितः संवत्सरसञ्चयः" कुल्लू०। मेधातिथिस्तु यावता धान्यादिधनेन बहुभृत्यदारादिमतः त्रिसंवत्सरस्थितिर्भवति तावत् सुवर्णादिधनवानपि कुसूलधान्यक इत्यभिधाय कुम्भी उष्ट्रिका षाण्मासिकधान्याद्दिनिचयः कुम्भीधान्यक इति व्याख्यातवान्। गोविन्दराजस्तु कुसूलधान्यक